শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমদ্বেঙ্কটাধ্ৱরি ৱিরচিতম্

# ॥শ্রীলক্ষ্মীসহস্রম্ ॥

## ॥ নির্ৱেদস্তবকঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ নির্ৱেদস্তবকঃ ॥

শরণীকরণীযাঙঘ্রিং শাশ্বত্তাপত্রযাতুরৈঃ।
সর্ৱনির্ৱেদশমনীং সমস্তজননীং নুমঃ॥ ১ ॥

অনুপাসিত তাৱকাঙঘ্রি পদ্মা-
ন্যপরামৃষ্ট পরাৱরস্থিতীনি।
জগদম্ব ৱৃথৈৱ জীর্যতো মে
সমতীতানি হি জন্মনাং শতানি॥ ২ ॥

অপৱর্গকথাপথাতিগানাম
অনুদাসীনহৃষীককিঙ্করাণাম্।
দিৱসা বহৱো ৱৃথৈৱ যাতাঃ
তৱ সানন্দমুপাসনং ৱিনা নঃ॥ ৩ ॥

অৱধীরিত সাধুসঙ্গমানাম
অপচারেষু চ বদ্ধকঙ্কণানাম্।
কথমন্যতমং কৃপানিধে মাং
কমলে হন্ত ৱৃথা কৃথাঃ খলানাম্॥ ৪ ॥

স্মারং স্মারং মলিনৱিষযান্ মানসং মেৱসন্নং
চারং চারং প্রতিখলগৃহং জাতখেদৌ চ পাদৌ।
কারং কারং কুজনৱিনুতিং ক্লেশিতা হন্ত জিহ্বা
ৱারং ৱারং ৱরজলনিধে কিং নু ৱিজ্ঞাপযেযম্॥ ৫ ॥

ৱিহিতমখিলং ত্যক্তৱা কৃত্বা চ গর্হিতমন্বহং
তদুচিতফলান্যত্রামুত্রাপ্যহো কলযন্নহম্।
গুণগণনিধে মৃত্বা মৃত্বা কিযন্তি যুগানি ৱা
মুররিজযিনো জাযে জাযেযমস্মি ভযাতুরঃ॥ ৬ ॥

তৃণত্যাজং ত্যক্তৱা ত্রিজগতি কলত্রাদিৱিষযান্
প্রণত্যা তে দিৱ্যাঃ কতি কতি গতিং যান্তি কৃতিনঃ।

অহং ত্বেৱং তাৱদ্বিষযৱিষযন্ত্রেষু পতিতঃ
ৱিষীদন্ সংসারে ৱিপদৱসরে রোদিমি রমে॥ ৭ ॥

জননি মহতি ৱংশে জন্ম লব্ধং ততঃ কিং
ৱিশদমধিগতে ৱা ৱেদশাস্ত্রে ততঃ কিম্।
সদসি কথকদর্পঃ সাদিতো ৱা ততঃ কিং
ভৱজলধিতরিস্তৱং ভাৱিতা চেন্ন চিত্তে॥ ৮ ॥

অটিত্বা দুর্দেশান্ সদসি চ নটিত্বা ক্ষিতিভুজাং
পঠিত্বা দীনোক্তীরপি ফলমলব্ধৱাতিচপলঃ।
অপারৈর্ৱ্যাপারৈরলসতনুরারাধনমহো
ভৱত্যা হিত্বাহং বলৱদৱসীদামি কমলে॥ ৯ ॥

নিরন্তরমরুন্তুদৈর্নিরযৱেদনাপাদনাদ্
দুরাসদধরাভুজামলমপাৱনৈঃ সেৱনৈঃ।
রমে ননু রমেত মে দুরিতমোচকে মেচকে
ঘনস্তনি মনস্তৱযা ঘটিতনর্মণি ব্রহ্মণি॥ ১০ ॥

জনিত হৃদৱসাদং শুষ্কনির্ৱেদৱাদং
জননি জহদপার্থং শশ্বদালম্ব্য ধৈর্যম্।
শরণমিহ ভজেযং সংশ্রিতান্যৈরজেযং
দনুজভিদমুদারং তং ভৱত্যা সদারম্॥ ১১ ॥

নির্ৱিণ্ণমব্ধিকন্যে
নিরীক্ষ্য মাং শীতলৈরপাঙ্গলৱৈঃ।
অভিষিঞ্চসি বলিৱঞ্চক
চরণদ্বয শরণ ৱরণসাম্রাজ্যে॥ ১২ ॥

॥ইতি শ্রীমদ্বেঙ্কটাধৱরিৱিরচিতে শ্রীলক্ষ্মীসহস্রে নির্ৱেদস্তবকঃ॥